लौकिकश्च ॥ तत्र लौकिकस्त्याज्य एव ॥ प्रतिबं-
धोऽपि द्विविधः–साधारणो भगवत्कृतश्च । तत्राद्यो
बुद्ध्या त्याज्यः ॥ अलौकिकभोगस्तु फलानां मध्ये
प्रथमे प्रविशति ॥ भगवत्कृतश्चेत्प्रतिबंधस्तदा भग-
वान् फलं न दास्यतीति मंतव्यम् ॥ तदान्यसेवापि
व्यर्थी, तदा आसुरोऽयं जीव इति निर्धारः, तदा
ज्ञानमार्गेण स्थातव्यं शोकाभावायेति विवेकः ॥
ननु साधारणो भोगः कथं त्यक्तव्य इत्याकांक्षाया-
माह सविघ्नोऽल्पो घातकः स्यादिति ॥ सविघ्नत्वाद-
ल्पत्वाद्भोगस्त्याज्यः ॥ एतौ सदा प्रतिबंधकौ ॥
द्वितीयो भगवत्कृतप्रतिबंधः ज्ञानस्थित्यभावे चिंता-
भावार्थमाह–द्वितीय इति ॥ आद्यफलाभावे भग-
वतो दातृत्वं नास्ति तदा सेवा नाधिदैविकीत्युक्तं
भवति ॥ भोगाभावस्तदैव सिद्ध्यति यदा गृहपरि-
त्यागः ॥

इति श्रीवल्लभाचार्यविरचितं सेवाफलविवरणं समाप्तम् ।

# अथ परिवृढाष्टकम् ।

श्रीकृष्णाय नमः ।

कलिंदोद्भूतायास्तटमनुचरंतीं पशुपजां
रहस्येकां दृष्ट्वा नवसुभगवक्षोजयुगलाम् ॥

दृढं नीवीग्रंथिं श्लथयति मृगाक्ष्या हठतरं
रतिप्रादुर्भावो भवतु सततं श्रीपरिवृढे ॥१॥
समायाते स्वस्मिन्सुरनिलयसाम्यं गतिवति
व्रजे वैशिष्ट्यं यो निजपदगताब्जांकुशयवैः ।
अकार्षीत्तस्मिन्मे यदुकुलसमुद्भासितमणौ
रतिप्रादुर्भावो भवतु सततं श्रीपरिवृढे ॥२॥
हिहीहीहींकारान्प्रतिपशु वने कुर्वति सदा ।
नमद्ब्रह्मेशेंद्रप्रभृतिषु च मौनं धृतवति ।
मृगाक्षीभिः स्वक्षानवकुवलयैरर्चितपदे ।
रतिप्रादुर्भावो भवतु सततं श्रीपरिवृढे ॥३॥
सकृत्स्मृत्वा कुंभी यमिह परमं लोकमगम-
च्चिरं ध्यात्वा धाता समधिगतवान्यं न तपसा ॥
विभौ तस्मिन्मह्यं सजलजलदालीनिभतनौ
रतिप्रादुर्भावो भवतु सततं श्रीपरिवृढे ॥४॥
परा काष्ठा प्रेम्णां पशुपतरुणीनां क्षितिभुजां
सुहृत्सानां त्रासास्पदमखिलभाग्यंयदुपतेः ॥
विभुर्यस्तस्मिन्मे दरविकचजंबालजमुखे
रतिप्रादुर्भावो भवतु सततं श्रीपरिवृढे ॥५॥
दरप्रादुर्भूतद्विजगणमहःपूरितवने
चरं कुह्वां राकारुचिरतरशोभाधिकरुचि ॥

हरिर्यस्तस्मिन्स्त्रीगणपरिवृतो नृत्यति सदा
रतिप्रादुर्भावो भवतु सततं श्रीपरिवृढे ॥६॥
स्फुरद्गुंजापुंजाकलितनिजपदाब्जविलुठत्
स्रजि श्यामाकामास्पदपदयुगे मेचकरुचि ।
वरांगे श्रृंगारं दधति शिखिनां पिच्छपटलै
रतिप्रादुर्भावो भवतु सततं श्रीपरिवृढे ॥७॥
दुरंतं दुःखाब्धिं हसितसुधया शोषयति यो
यदास्येंदुर्गोपीनयननलिनानंदकरणम् ।
अनंगः सांगत्वं व्रजति मम तस्मिन् मुररिपौ
रतिप्रादुर्भावो भवतु सततं श्रीपरिवृढे ॥८॥
इदं यः स्तोत्रं श्रीपरिवृढसमीपे पठति वा ।
श्रृणोति श्रद्धावान् रतिपतिपितुः पादयुगले ॥
रतिं प्रेप्सुः शश्वत्कुवलयदलश्यामलतनौ ।
रतिः प्रादुर्भूता भवति नचिरात्तस्य सुदृढा ॥९॥

इति श्रीवल्लभाचार्यविरचितं श्रीपरिवृढाष्टकं समाप्तम् ।

# अथ श्रीमधुराष्टकम् ।

श्रीकृष्णाय नमः ।

अधरं मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरम् ।
हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलंमधुरम् ।१।